শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে ত্রিংশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে ৱিংশং দশকম্ ॥

## ঋষভযোগীশ্ৱরচরিতৱর্ণনম্

প্রিযৱ্রতস্য প্রিযপুত্রভূতা -
    দাগ্নীধ্ররাজাদুদিতো হি নাভিঃ।
ৎৱাং দৃষ্টৱানিষ্টদমিষ্টিমধ্যে
    তৱৈৱ তুষ্ট্যৈ কৃতযজ্ঞকর্মা ॥ **20.1** ॥

অভিষ্টুতস্তত্র মুনীশ্ৱরৈস্ত্ৱং
    রাজ্ঞঃ স্ৱতুল্যং সুতমর্থ্যমানঃ।
স্ৱযং জনিষ্যেঽহমিতি ব্রুৱাণ -
    স্তিরোদধা বর্হিষি ৱিশ্ৱমূর্তে ॥ **20.2** ॥

নাভিপ্রিযাযামথ মেরুদেৱ্যাং
    ৎৱমংশতোঽভূরৃষভাভিধানঃ।
অলোকসামান্যগুণপ্রভাৱ -
    প্রভাৱিতাশেষজনপ্রমোদঃ ॥ **20.3** ॥

ৎৱযি ত্রিলোকীভৃতি রাজ্যভারং
    নিধায নাভিঃ সহ মেরুদেৱ্যা।
তপোৱনং প্রাপ্য ভৱন্নিষেৱী
    গতঃ কিলানন্দপদং পদং তে ॥ **20.4** ॥

ইন্দ্রস্ত্ৱদুৎকর্ষকৃতাদমর্ষা -
    দ্ৱৱর্ষ নাস্মিন্নজনাভৱর্ষে।

যদা তদা ৎৱং নিজযোগশক্ত্যা
    স্ৱৱর্ষমেনদ্ব্যদধাঃ সুৱর্ষম্॥ **20.5**॥

জিতেন্দ্রদত্তাং কমনীং জযন্তী -
    মথোদ্বহন্নাত্মরতাশযোঽপি।
অজীজনস্তত্র শতং তনূজা -
    নেষাং ক্ষিতীশো ভরতোঽগ্রজন্মা॥ **20.6**॥

নৱাভৱন্ যোগিৱরা নৱান্যে
    ৎৱপালযন্ ভারতৱর্ষখণ্ডান্।
সৈকা ৎৱশীতিস্তৱ শেষপুত্রা -
    স্তপোবলাৎ ভূসুরভূযমীযুঃ॥ **20.7**॥

উকত্বা সুতেভ্যোঽথ মুনীন্দ্রমধ্যে
    ৱিরক্তিভক্ত্যন্ৱিতমুক্তিমার্গম্।
স্ৱযং গতঃ পারমহংস্যৱৃত্তি -
    মধা জডোন্মত্তপিশাচচর্যাম্॥ **20.8**॥

পরাত্মভূতোঽপি পরোপদেশং
    কুর্ৱন্ ভৱান্ সর্ৱনিরস্যমানঃ।
ৱিকারহীনো ৱিচচার কৃৎস্নাং
    মহীমহীনাত্মরসাভিলীনঃ॥ **20.9**॥

শযুৱ্রতং গোমৃগকাকচর্যাং
    চিরং চরন্নাপ্য পরং স্ৱরূপম্।
দৱাহৃতাঙ্গঃ কুটকাচলে ৎৱং
    তাপান্ মমাপাকুরু ৱাতনাথ॥ **20.10**॥

॥ ইতি শ্রীমন্নারাযণীযে ৱিংশং দশকং সমাপ্তম্॥